श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री वादिराजयति कृता

॥ श्री दशावतारस्तुतिः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री दशावतारस्तुतिः ॥

प्रोष्ठीशविग्रह सुनिष्ठीवनोद्धत विशिष्टाम्बुचारि जलधे
कोष्ठान्तराहित विचेष्टागमौघ परमेष्ठीडित त्वमव माम्।
प्रेष्ठार्कसूनुमनु चेष्टार्थमात्मविदतीष्टो युगान्त समये
स्थेष्टात्म शृङ्गधृत काष्ठाम्बुवाहन वराष्टापदप्रभतनो ॥ 1 ॥

खण्डीभवद्बहुळडिण्डीरजृम्भण सुचण्डी कृतोदधिमहा -
काण्डाति चित्र गति शौण्डाद्य हैमरद भाण्डाप्रमेयचरित।
चण्डाश्वकण्ठमद शुण्डाल दुर्ह्रदय गण्डा भिखण्डकरदो -
श्चण्डामरेश हयतुण्डाकृते दृशम खण्डा मलं प्रदिश मे ॥ 2 ॥

कूर्माकृते त्ववतु नर्मात्म पृष्ठधृत भर्मात्म मन्दर गिरे
धर्मावलम्बन सुधर्मा सदाकलित शर्मा सुधावितरणात्।
दुर्मान राहुमुख दुर्मायि दानवसुमर्मा भिभेदन पटो
धर्मार्क कान्ति वर वर्मा भवान् भुवन निर्माण धूत विकृतिः ॥ 3 ॥

धन्वन्तरेऽङ्गरुचि धन्वन्तरेऽरितरु धन्वंस्तरीभवसुधा -
भान्वन्तरावसथ मन्वन्तराधिकृत तन्वन्तरौषधनिधे।
धन्वन्तरङ्गशुगुधन्वन्तमाजिषु वितन्वन् ममाब्धितनया -
सून्वन्तकात्महृदतन्वन्तरावयव तन्वन्तरार्तिजलधौ ॥ 4 ॥

या क्षीरवार्धिमथनाक्षीणदर्पदितिजाक्षोभितामरगणा -
पेक्षाप्तयेऽजनि वलक्षांशुबिम्बजिदतीक्ष्णालकावृतमुखी।
सूक्ष्मावलग्नवसनाऽऽक्षेपकृत्कुच कटाक्षाक्षमीकृतमनो -
दीक्षासुराहृतसुधाऽक्षाणि नोऽवतु सुरूक्षेक्षणाद्धरितनुः ॥ 5 ॥

शिक्षादियुङ्निगम दीक्षासुलक्षण परीक्षाक्षमा विधिसती
दाक्षायणी क्षमति साक्षाद्रमाऽपि न यदाक्षेपवीक्षणविधौ।
प्रेक्षाक्षिलोभकरलाक्षारसोक्षित पदाक्षेपलक्षितधरा
साऽक्षारितात्मतनु भूक्षारकारिनिटिलाक्षाऽक्षमानवतु नः॥ 6॥

नीलाम्बुदाभशुभ शीलाद्रिदेहधर खेलाहृतोदधिधुनी -
शैलादियुक्त निखिलेलाकटाद्यसुर तूलाटवीदहन ते।
कोलाकृते जलधि कालाचलावयव नीलाब्जदंष्ट्र धरणी -
लीलास्पदोरुतर मूलाशियोगिवर जालाभिवन्दित नमः॥ 7॥

दम्भोलितीक्ष्णनख सम्भेदितेन्द्ररिपु कुम्भीन्द्र पाहि कृपया
स्तम्भार्भकासहन डिम्भाय दत्तवर गम्भीरनाद नृहरे।
अम्भोधिजानुसरणाम्भोजभूपवन कुम्भीनसेश खगराट् -
कुम्भीन्द्र कृत्तिधर जम्भारिषण्मुख मुखाम्भोरुहाभिनुत माम्॥ 8॥

पिङ्गाक्ष विक्रम तुरङ्गादि सैन्य चतुरङ्ग वलिप्त दनुजा -
साङ्ग ध्वरस्थ बलि साङ्गावपात हृषिताङ्गामरालिनुत ते।
शृङ्गार पादनख तुङ्गाग्रभिन्न कनकाङ्गाण्डपाति तटिनी -
तुङ्गाति मङ्गल तरङ्गाभिभूत भज काङ्गाघ वामन नमः॥ 9॥

ध्यानार्ह वामनतनो नाथ पाहि यजमाना सुरेशवसुधा -
दानाय याचनिक लीनार्थ वाग्वशित नानासदस्य दनुज।
मीनाङ्क निर्मल निशानाथ कोटिल समानात्म मौञ्जिगुणकौ -
पीनाच्छ सूत्रपद यानात पत्रकर कानम्यदण्डवरभृत्॥ 10॥

धैर्याम्बुधे परशुचर्याधिकृत्तखल वर्यावनीश्वर महा -
शौर्याभिभूतकृत वीर्यात्मजातभुज वीर्यावलेपनिकर।
भार्यापराधकुपितार्याज्ञया गलितनार्यात्मसूगलतरो
कार्याऽपराधमविचार्यार्य मौघजयि वीर्यामिता मयि दया॥ 11॥

श्रीरामलक्ष्मणशुकारामभूरवतु गौरामलामितमहो -
हारामरस्तुत यशो रामकान्तिसुतनो रामलब्धकलह।
स्वारामवर्यरिपु वीरामयर्धिकर चीरामलावृतकटे
स्वाराम दर्शनजमारामयागतसुघोरामनोरथहर॥ 12॥

श्रीकेशवप्रदिशनाकेश जातकपिलोकेश भग्नरविभू -
स्तोकेतरार्तिहरणाकेवलार्थसुखधीकेकिकालजलद।
साकेतनाथ वरपाकेरमुख्यसुत कोकेन भक्तिमतुलां
राकेन्दु बिम्बमुख काकेक्षणापह हृषीकेश तेऽङ्घ्रिकमले॥ 13॥

रामेनृणां हृदभिरामेनराशिकुल भीमेमनोऽद्यरमतां
गोमेदिनीजयितपोऽमेयगाधिसुत कामेनिविष्ट मनसि।
श्यामे सदा त्वयिजितामेय तापसज रामे गताधिकसमे
भीमेशचापदलनामेयशौर्यजित वामेक्षणे विजयिनी॥ 14॥

कान्तारगेहखल कान्तारटद्वदन कान्तालकान्तकशरं
कान्ताऽऽरयाऽम्बुजनि कान्तान्ववायविधु कान्ताश्मबाधिप हरे।
कान्तालिलोलदल कान्ताभिशोभितिल कान्ता भवन्तमनु सा
कान्तानुयानजित कान्तारदुर्गकट कान्ता रमा त्ववतु माम्॥ 15॥

दान्तं दशानन सुतान्तं धरामधिवसन्तं प्रचण्ड तपसा
क्लान्तं समेत्य विपिनान्तं त्ववाप यमनन्तं तपस्विपटलम्।
यान्तं भवारति भयान्तं ममाशु भगवन्तं भरेण भजतात्
स्वान्तं सवारिदनुजान्तं धराधरनिशान्तं सतापसवरम्॥ 16॥

शम्पाभचापलव कम्पास्त शत्रुबल सम्पादितामितयशाः
शं पाद तामरस सम्पाति नोऽलमनु कम्पारसेन दिश मे।
सम्पाति पक्षि सहजं पापरावणहतं पावनं यद कृथा
स्त्वं पापकूपपतितं पाहि मां तदपि पम्पा सरस्तटचर॥ 17॥

लोलाक्ष्यपेक्षितसुलीलाकुरङ्गवध खेलाकुतूहल गते
स्वालापभूमिजनिबालापहार्यनुज पालाद्य भो जय जय।
बालाग्निदग्धपुर शालानिलात्मजनि फालात्तपत्तलरजो
नीलाङ्गदादिकपि मालाकृतालिपथ मूलाभ्यतीत जलधे॥ 18॥

तूणीरकार्मुककृपाणीकिणाङ्कभुज पाणी रविप्रतिमभाः
क्षोणीधरालिनिभ घोणी मुखादिघनवेणीसुरक्षणकरः।
शोणीभवन्नयन कोणी जिताम्बुनिधि पाणीरितार्हणमणि -
श्रेणीवृताङ्घ्रिरिह वाणीशसूनुवर वाणीस्तुतो विजयते॥ 19॥

हुङ्कारपूर्वमथ टङ्कारनादमति पङ्काऽवधार्य चलिता
लङ्का शिलोच्चयविशङ्का पतद्भिदुर शङ्काऽऽस यस्य धनुषः।
लङ्काधिपोऽमनुत यङ्कालरात्रिमिव शङ्काशताकुलधिया
तङ्कालदण्डशत सङ्काशकार्मुख शराङ्कान्वितं भज हरिम्॥ 20॥

धीमानमेयतनुधामाऽऽर्तमङ्गलदनामा रमाकमलभू -
कामारिपन्नगप कामाहि वैरिगुरु सोमादिवन्द्य महिमा।
स्थेमादिनापगत सीमाऽवतात् सखल सामाज रावणरिपू
रामाभिधो हरिरभौमाकृतिः प्रतन सामादि वेदविषयः॥ 21॥

दोषाऽऽत्मभूवशतुराषाडतिक्रमज रोषात्मभर्तृवचसा
पाषाणभूतमुनियोषावरात्मतनुवेषादिदायिचरणः।
नैषादयोषिदशुभेषाकृदण्डजनि दोषाचरादि शुभदो
दोषाग्रजन्ममृतिशोषापहोऽवतु सुदोषाङ्घ्रिजातहननात्॥ 22॥

वृन्दावनस्थपशु वृन्दावनं विनुत वृन्दारकैकशरणं
नन्दात्मजं निहत निन्दा कृदा सुरजनन्दामबद्ध जठरम्।
वन्दामहे वयम मन्दावदातरुचि मन्दाक्षकारिवदनं
कुन्दालिदन्तमुत कन्दासितप्रभतनुन्दावराक्षसहरम्॥ 23॥

गोपालकोत्सवकृतापारभक्ष्यरस सूपान्नलोपकुपिता -
शापालयापितलयापाम्बुदालिसलिलापायधारितगिरे।
स्वापाङ्गदर्शनजतापाङ्ग रागयुत गोपाङ्ग नांशुक हृति -
व्यापार शौण्डविविधापाय तस्त्वमव गोपारिजातहरण॥ 24॥

कंसादिकासदवतंसा वनीपतिविहिंसाकृतात्मजनुषं
संसारभूतमिह संसारबद्धमन संसारचित्सुखतनुम्।
संसाधयन्तमनिशं सात्त्विकव्रतमहंसादरं बत भजे
हंसादितापसरिरंसास्पदं परमहंसादि वन्द्य चरणम्॥ 25॥

राजीव नेत्रविदुराजीवमामवतु राजीव केतनवशं
वाजीभपत्तिनृपराजी रथान्वितज राजीव गर्वशमन।
वाजीशवाहसित वाजीश दैत्य तनु वाजीश भेदकरदो -
र्जाजीकदम्बनव राजीव मुख्यसुम राजीसुवासितशिरः॥ 26॥

कालीह्रदावसथ कालीयकुण्डलिप कालीस्थपादनखरा -
व्यालीनवांशुकर वालीगणारुणित कालीरुचे जय जय।
केलीलवापहृत कालीशदत्तवर नालीकदृप्तदितिभू -
चूलीकगोपमहिलालीतनूघसृणधूलीकणाङ्कहृदय॥ 27॥

कृष्णादि पाण्डुसुत कृष्णा मनःप्रचुर तृष्णा सुतृप्तिकरवाक्
कृष्णाङ्कपालिरत कृष्णाभिधाघहर कृष्णादिषण्महिल भोः।
पुष्णातु मामजित निष्णातवार्धिमुद नुष्णांशु मण्डल हरे
जिष्णो गिरीन्द्र धर विष्णो वृषावरज धृष्णो भवान् करुणया॥ 28॥

रामाशिरोमणिधरामासमेत बलरामानुजाभिधरतिं
व्योमासुरान्तकर ते मारतात दिशमे माधवाङ्घ्रिकमले।
कामार्तभौमपुर रामावलीप्रणय वामाक्षिपीततनुभा
भीमाहिनाथमुखवैमानिकाभिमत भीमाभिवन्द्य चरण॥ 29॥

सक्ष्वेलभक्ष्यभय दाक्षिश्रवो गणज लाक्षेपपाशयमनं
लाक्षागृहज्वलन रक्षो हिडिम्बबक भैक्षान्नपूर्वविपदः।
अक्षानुबन्धभवरूक्षाक्षरश्रवण साक्षान्महिष्यवमती
कक्षानुयानमधमक्ष्मापसेवनमभीक्ष्णापहासमसताम्॥ 30॥

चक्षाण एवनिज पक्षाग्रभूदशशताक्षात्मजादि सुहृदाम्
आक्षेपकारिकुनृपाक्षोहिणीशतबलाक्षोभदीक्षितमनाः।
ताक्ष्र्यासिचापशरतीक्ष्णारिपूर्वनिज लक्ष्माणि चाप्यगणयन्
वृक्षालयध्वजरिरक्षाकरो जयति लक्ष्मीपतिर्यदुपतिः॥ 31॥

बुद्धावतारकवि बद्धानुकम्पकुरु बद्धाञ्जलौ मयि दयां
शौद्धोदनिप्रमुख सैद्धान्तिका सुगम बौद्धागमप्रणयन।
क्रुद्धाहितासुहृतिसिद्धासिखेटधर शुद्धाश्वयान कमला -
शुद्धान्त मां रुचिपि नद्धाखिलाङ्ग निज मद्धाऽव कल्क्यभिध
भोः॥ 32॥

सारङ्ग कृत्तिधर सारङ्ग वारिधर सारङ्ग राजवरदा -
सारङ्गदारितर सारङ्गतात्मद सारङ्गतौषधबलम्।
सारङ्गवत्कुसुम सारङ्ग तच्चतव सारङ्गमाङ्घ्रियुगलं
सारङ्ग वर्णमप सारङ्ग ताब्जमद सारङ्गदिंस्त्वमव माम्॥ 33॥

ग्रीवास्य वाहतनु देवाण्डजादिदश भावाभिराम चरितं
भावातिभव्यशुभ धीवादिराजयति भूवाग्विलास निलयम्।
श्रीवागधीशमुख देवाभिनम्य हरिसेवार्चनेषु पठताम्
आवास एवभविताऽवाग्भवेतरसुरावासलोकनिकरे॥ 34॥

॥ श्री दशावतारस्तुतिः समाप्ता॥